बह्वर्थपर्य्याप्तेरन्वयात् संख्यायाः पतनादिसमवायित्वविरहेऽपि न क्षतिः पटानां शतं संख्या इत्याद्यनुरोधेनैव शतादेर्गुणवाचित्वसम्भवात् ।

तत्र कृत्यादिकं नाख्यातस्यार्थः किन्तु कालः संख्या च तयोः प्रकारान्तरालभ्यत्वात् चैत्रः पचति रथो गच्छतीत्यादौ धात्वर्थस्यैव पाकगत्यादेः कृतिमत्त्वाश्रयत्वादिसम्बन्धेन चैत्रादौ प्रकारत्वात् मैत्रः पच्यत इत्यादितो मैत्रादेः कर्तृत्वादिना तण्डुलः पचतीत्यादौ तण्डुलादेः कर्मत्वादिना संसर्गेण पाकादावनन्वयेन धात्वर्थ एव धर्मिणि नामार्थस्य भेदेनान्वयोऽव्युत्पन्नो न तु नामार्थेऽपि धात्वर्थस्य । नचैवं ज्ञानं चैत्र इत्यादितोऽपि बोधरूपस्य धात्वर्थस्याश्रयत्वसम्बन्धेन चैत्रे धर्मिण्यन्वयप्रसङ्गः, तत्र ज्ञानादिपदस्य बुध्यर्थकनामतया तदर्थस्य नामान्तरार्थे भेदेनान्वयस्याव्युत्पन्नत्वादेव तदसम्भवात् इति प्राभाकराः । तदसत् धात्वर्थानुविद्धस्वार्थकर्तृतायामेव लडादेः स्वोपस्थाप्यवर्त्तमानत्वाद्यनुभावकत्वव्युत्पत्तेः कृत्यादेस्तिङर्थत्वं विना तदनुपपत्तेः अन्यथातिप्रसङ्गात् । न च प्रकृत्यर्थ एव तिङः स्वार्थवर्त्तमानत्वाद्यनुभावकत्वनियमः पाकमनिष्पाद्य क्रियान्तरव्यासक्तेऽपि पुरुषे पचतीतिप्रयोगापत्तेः तदानीमपि पाकस्यानुवर्त्तमानत्वात् तिङाद्यन्तधात्वर्थस्य पाकादेर्व्वर्त्तमानकृत्यादिसम्बन्धेनैव प्रथमान्तस्य नाम्नोऽर्थे साकाङ्क्षत्वान्नैवमिति चेत् किं कालस्यापि तिङर्थत्वप्रत्याशया संसर्गविधयैव तस्य लभ्यत्वात् । पचतीत्यादितो वर्त्तमानत्वादिवत्कृतिप्रकारकप्रतीतेरानुभविकत्वाच्च । किञ्च धात्वर्थस्यैव कृत्यादिसम्बन्धेन चैत्रादावन्वये पचत्यपि चैत्रे नायं पचतीतिप्रयोगप्रसङ्गः संयोगादिसम्बन्धेन पाकाद्यभावस्य तत्र सत्त्वात् कर्तृत्वादेर्वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नपाकाद्यभावस्यालीकत्वेन प्रत्येतुमशक्यत्वात् । एतेन मण्डनमते फलस्य धात्वर्थत्वात् तदनुकूलक्रियैवाख्यातेन चैत्रादावनुभाव्यते इति कृतेस्तिङर्थत्वाभावादुक्तलक्षणमसम्भवीत्यपि प्रत्युक्तं फलस्य धात्वर्थत्वे संयोगो गुणइतिवद्गतिर्गुणोऽनेकाश्रिता इत्यादिप्रयोगापत्तेश्च न हि भावकृतामपि क्रियार्थः प्रमाणाभावात् । ननु यदि स्वार्थकर्तृत्वएव लडादिना वर्त्तमानत्वमनुभाव्यते इति नियमः कथं तर्हि कैत्रात् पच्यत इत्यादितः पाकादौ वर्त्तमानत्वधीरिति चेत् कएवमाह तत्राप्येकपदोपात्तत्वेन कर्म्माख्यातोपस्थापिते कर्तृत्वएव वर्त्तमानत्वस्यान्वयात् । इयान् परं विशेषोयत् कर्तृविहितेन लटा धात्वर्थस्य विशेष्यत्वेन, कर्म्मविहितेन तु तस्य विशेषणत्वेन स्वार्थकर्तृत्वमनुभाव्यते तथैव साकाङ्क्षत्वात् । एतेन चैत्रेण पक्वमित्यादाविव चैत्रेण पच्यते इत्यत्रापि तृतीययैव कर्तृत्वमनुभाव्यते नत्वाख्यातेन, तिङर्थकृतेर्धात्वर्थविशेष्यत्वनियमादिति दीधितिकृन्मतमप्यनादेयम् एकपदोपात्तत्वेन स्वार्थएव कर्तृत्वे शतृशानजादेरिव लडादेर्व्वर्त्तमानत्वबोधकतया सुबर्थकृतौ तदन्वयासम्भवात् सुबर्थे तिङर्थान्वयस्यादृष्टचरत्वाच्चेति । शाब्दिकास्तु चैत्रः पचतीत्यादितः पाकादिकृतिमत्तयैव तत्कर्तृभेदेनापि चैत्रादेरन्वयस्यानुभविकत्वात् कृतिरिव कर्त्तापि तिङर्थः कृतित्वमपेक्ष्य कर्तृत्वस्य गुरुत्वान्न तदाख्यातस्य शक्यतावच्छेदकमिति तु रिक्तं वचः लक्ष्यतावच्छेदके लक्षणाया इव शक्यतावच्छेदकेऽपि शक्तेरसत्त्वमते तद्गुरुत्वस्याकिञ्चित्करत्वात् एकैकात्मनिष्ठानामनन्तकृतीनां शक्यत्वमपेक्ष्य निखिलात्मनामेव कर्तृत्वे शक्यतायां विपरीतलाघवाच्च । न च कर्त्रनुभवजनकतया सङ्केतितत्वरूपं कर्तृशक्तत्वमेव तिङामसिद्धं, कर्त्रन्वयानुभवजनकतासत्त्वे तत्प्रकारकेश्वरसङ्केतस्य तत्रावश्यम्भावादीश्वरेच्छायाः सदर्थावगाहित्वनियमादन्यथा कर्त्रनुभवस्वरूपायोग्यत्वादेव तिङां कर्त्तर्य्यशक्तत्वसम्भवे कृत्यपेक्षया कर्त्तरि गुरुत्वोपन्यासस्योन्मत्तप्रलपितत्वापत्तेः । अथैवं पटपदस्यापि लक्षणादिना घटाद्यन्वयानुभावकत्वात् तत्प्रकारकनित्यसङ्केतवत्त्वेन तदपि घटशक्तं स्यात्, न स्यात् पटपदं घटे न शक्तमित्यादिव्यवहारस्य प्रामाणिकत्वेन घटादिपदनिष्ठस्यैव घटानुभावकतया नित्यसङ्केतितत्वस्य घटशक्तित्वात् इत्याख्यातं न कर्तृशक्तमित्येवं व्यवहारस्यासत्त्वात् प्रत्युत पाणिन्यादिप्रामाणिकैस्तिङः कर्तृशक्तत्वेन व्यवहृतत्वात् । एतेन गुणवचनस्य नीलादेर्गुणिशक्तत्वमपि व्याख्यातम् इति प्राहुः” ।

आख्यातार्थस्य धात्वर्थादौ विशेषणतयैवान्वय इति तु वैयाकरणाः यथाह वै०भू०सा०। “फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः । फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्” इति । अस्य व्याख्यायाम् ‘कर्त्तरि कृत्’ “लः कर्मणि च” पा०सूत्राभ्यां चकारेण कर्त्तरि कर्मणि च तिङः शक्तिरिति लाभे तत्र व्यापाराश्रयः कर्त्ता फलाश्रयः कर्मेति फलव्यापाररूपयोः विशेषणयोर्धातुनैवोपस्थाप्यत्वात् अनन्यलभ्यस्याश्रयस्यैव तिङर्थत्वम् इत्येवं व्यवस्थाप्येत्थमाह । ‘पदार्थं निरूप्य वाक्यार्थं निरूपयति